चि, क मि चित्याम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-द्विकं-सेट् ।) क मि, चययति चाययति । स्वमते तु चपयति चापयतीत्यपि । इति दुर्गादासः ॥

चिकित्सकः, पुं, (चिकित्सति रोगमपनयतीति । कित् + "गुप्तिज्किद्भ्यः सन् ।" ३।१।५। इति स्वार्थे सन् + ण्वुल् ।) चिकित्साकर्त्ता । (यथा, मनुः । ९ । २८४ ।
"चिकित्सकानां सर्व्वेषां मिथ्या प्रचरतां दमः॥")
तत्पर्य्यायः । रोगहारी २ अगदङ्कारः ३ भिषक् ४ वैद्यः ५ । इत्यमरः । २ । ६ । ५७ ॥ तस्य लक्षणं यथा, चाणक्ये ।
"आयुर्व्वेदकृताभ्यासः सर्व्वेषां प्रियदर्शनः ।
आर्य्यशीलगुणोपेत एष वैद्यो विधीयते ॥"

चिकित्सा, स्त्री, (चिकित्सनमिति । कित् व्याधि-प्रतीकारे + "गुप्तिज्किद्भ्यः सन् ।" ३ । १ । ५ । इति स्वार्थे सन् ततः अप्रत्ययः ।) रोगप्रतीकारः । तत्पर्य्यायः । रुक्प्रतिक्रिया २ । इत्यमरः । २ । ६ । ५० ॥ उपचारः ३ उपचर्य्या ४ निग्रहः ५ वेदनानिग्रहः ६ क्रिया ७ उपक्रमः ८ शमः ९ । इति राजनिर्घण्टः ॥ चिकित्सितम् १० प्रतीकारः ११ भिषग्जितम् १२ । इति रत्नमाला ॥ रोगप्रतिकारः १३ । इति शब्दरत्नावली ॥ सा त्रिधा यथा, वैद्यके ।
"आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता ।
रसप्रधाना दैवी स्यात् छेदभेदात्मिकासुरी ॥
मानुषी यद्वसा ज्ञेया जपहोमादिसंस्कृता ।
कलौ चाल्पबले लोके मानुषी तत्र पूजिता ॥"
तस्या लक्षणं यथा,—
"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः ।
सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम्॥
या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् ॥"
चिकित्साविध्युपदेशो यथा,— [गदः ।
"जातमात्रश्चिकित्स्यः स्यान्नोपेक्ष्योऽल्पतया
वह्निशत्रुविषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ ॥
रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।
ततः कर्म्म भिषक् पश्चाज्ज्ञानपूर्ब्बं समाचरेत् ॥
औषधं केवलं कर्त्तुं यो जानाति न चौषधम् ।
वैद्यकर्म्म स चेत् कुर्य्याद्वधमर्हति राजतः ॥
आदावन्ते रुजां ज्ञाने प्रयतेत चिकित्सकः ।
भेषजानां विधानेऽथ ततः कुर्य्यात् चिकित्सितम्॥
शीते शीतप्रतीकारमुष्णे चोष्णनिवारणम् ।
कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत् ॥
अप्राप्ते वा क्रियाकाले प्राप्ते वा न क्रिया कृता ।
क्रियाहीनातिरिक्ता च साध्येष्वपि न सिध्यति ॥
क्रिया यास्तु गुणालाभे क्रियामन्यां प्रयोजयेत् ।
पूर्ब्बस्यां शान्तवेगायां न क्रियासङ्करो मतः ॥"
चिकित्साफलं यथा,—
"क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्म्मः क्वचिद्यशः ।
कर्म्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला ॥"* ॥
चिकित्साङ्गानि यथा, भावप्रकाशे ।
"रोगी दूतो भिषग्दीर्घमायुर्न्यश्च सेवकः ।
सदौषधं चिकित्सायामित्यङ्गानि बुधा जगुः ॥"

चिकित्सितं, क्ली, (कित् + स्वार्थे सन् ततो भावे क्तः ।) चिकित्सा । इति रत्नमाला ॥ (यथा, सुश्रुते सूत्रस्थाने २ अः । [तम् ॥"
"बीजं चिकित्सितस्यैतत् समासेन प्रकीर्त्ति-
पर्य्याया अस्य यथा, वैद्यकरत्नमालायाम् ।
"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्जितम् ॥"
चिकित्स्यतेऽनेनेति । करणे क्तः । भेषजम् । अस्य पर्य्याया यथा, चरके चिकित्सास्थाने १ अः ।
"चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम् ।
प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम् ॥
विद्याद्भेषजनामानि भेषजं द्विविधञ्च तत् ।
यद्व्याधिनिर्घातकरं वक्ष्यते तच्चिकित्सितम् ॥
चिकित्सितार्थ एतावान् विकाराणां यदौषधम् ।"
यथा, भागवते । १ । ५ । ३२ ।
"एतत् संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम् ।
यदीश्वरे भगवति कर्म्म ब्रह्मणि भावितम् ॥")
कृतप्रतीकारे त्रि ॥

चिकिनः, त्रि, (नि नता नासिकास्त्यस्य । "इनच्-पिटच्-चिकचि च ।" ५ । २ । ३३ । इति इनच् प्रकृतेश्चिकादेशश्च ।) चिपिटनासिकः । इति केचित् ॥

चिकिलः, पुं, (चि + बाहुलकात् इलच् कुक् च ।) पङ्कः । इति हेमचन्द्रः । ४ । १५६ ॥

चिकीर्षा, स्त्री, (कर्त्तुमिच्छा इति । "धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा ।" ३ । १ । ७ । इति कृधातोः इच्छार्थकसन्प्रत्ययेन चिकीर्ष् । ततः "अप्रत्ययात् ।" ३ । ३ । १०२ । इत्यः ।) कर्त्तुमिच्छा । इति मुग्धबोधम् ॥ करिवार वाञ्छा इति भाषा । (यथा, भागवते ।२।१०।२४।
"हस्तौ रुरुहतुस्तस्य नानाकर्म्मचिकीर्षया ॥")

चिकीर्षुः, त्रि, (चिकीर्षतीति । कृ + सन् + "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) कर्त्तुमिच्छुः । करणेच्छाविशिष्टः । इति व्याकरणम् ॥

चिकुरः, पुं, (चि इत्यव्यक्तशब्दं कुरतीति । कुर-शब्दे + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) केशः । (यथा, राजतरङ्गिण्याम् ।८।३६७।
"चिकुरनिचये यत् कौटिल्यं विलोचनयोश्च या ॥")
सर्पः । (अयं हि ऐरावतकुलजातस्य सुमुखस्य पिता । यथा, महाभारते । ५ । १०३ । २४ ।
"एतस्य हि पिता नागश्चिकुरो नाम मातले !।
न चिरात् वैनतेयेन पञ्चत्वमुपपादितः ॥")
पर्व्वतः । पक्षिभेदः । वृक्षविशेषः । गृहबभ्रुः । तरलः । इति मेदिनी । रे, १५५ ॥

चिकुरः, त्रि, (चि + कुर + कः ।) चपलः । स तु दोषमनिश्चित्य वधबन्धनादेः कर्त्ता । इत्यमरः । ३ । १ । ४६ ॥

चिकुरपक्षः, पुं, (चिकुराणां केशानां पक्षः समूहः ।) कचसमूहः । केशसमुदयः । इत्यमरः । २ । ६ । ९८ ॥

चिकुरपाशः, पुं. (चिकुराणां केशानां पाशः समूहः ।) केशसमूहः । इत्यमरः । २ । ६ ।९८॥

चिकुरहस्तः, पुं, (चिकुराणां हस्तः समूहः ।) केशसमूहः । इत्यमरः । २ । ६ । ९८ ॥

चिकूरः, पुं, (चिकुर + निपातनात् दीर्घः ।) केशः । इति शब्दभेदप्रकाशः ॥

चिक्क, क अर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) कोपधः । तृतीयस्वरमध्यः । अर्त्तिः पीड़नम् । क, चिक्कयति शत्रुं शूरः । इति दुर्गादासः ॥

चिक्कः, पुं, (चिक् इत्यव्यक्तशब्देन कायति शब्दायते इति । चिक् + कै + कः ।) छुच्छुन्दरिः । इति त्रिकाण्डशेषः ॥ (नि नता नासिकास्य-स्येति । "इनच्पिटचिति ।" ५ । २ । ३३ । इत्यस्य वार्त्तिं "कप्रत्ययचिकादेशौ च वक्तव्यौ ।" इति कप्रत्ययो नेश्चिकादेशश्च । नतनासिके, त्रि । इति सिद्धान्तकौमुदी ॥)

चिक्कणं, त्रि, (चित्यते ज्ञायते इति । चित् + "चितेः कणः कश्च ।" उणां । ४ । १७६ । इति कर्म्मणि कणः कश्चान्तादेशः । बाहुलकाद्गुणः ।) स्निग्धव्यञ्जनादि (स्निग्धत्वमसृणत्वादिगुणवद्वस्तु ।) इत्यमरः । २ । ९ । ४६ ॥ चिक्‌णा इति भाषा ॥ (यथा, महाभारते । १२ । १८४ । ३४ ।
"कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो मृदु-दारुणः ॥")

चिक्कणः, पुं, (चिक्कणं स्निग्धगुणं विद्यतेऽस्य । अच् ।) पूगवृक्षः । तत्फले क्ली । इति राजनिर्घण्टः ॥ (औषधपाकस्यावस्थाविशेषो यथा,
"पाकस्तु त्रिविधो मन्दश्चिक्कणः खरचिक्कणः ॥"
इति वाभटे कल्पस्थाने षष्ठेऽध्याये ॥)

चिक्कणा, स्त्री, (चिक्कणं मसृणता विद्यतेऽस्याः । अर्श आदित्वादच् । ततष्टाप् ।) उत्तमा गौः । तत्पर्य्यायः । नैचिकी २ । इति शब्दचन्द्रिका ॥ पूगफलम् । इति राजनिर्घण्टः ॥

चिक्कणी, स्त्री, (चिक्कण + गौरादित्वात् ङीष् ।) पूगफलम् । इति राजनिर्घण्टः ॥

चिक्कसः, पुं, (चिक्कयति पीड़यति चूर्णकारिणमिति । चिक्क + असच् ।) यवचूर्णम् । इति हेमचन्द्रः । ३ । ६६ ॥

चिक्का, स्त्री, (चिक्कयति पीड़यति भोक्तारमिति । चिक्क + अच् ।) पूगफलम् । इति राजनिर्घण्टः ॥

चिङ्गटः, पुं, (चिङ्ग इत्यव्यक्तशब्देन अटतीति । अट गतौ + अच् । शकन्ध्वादिवत् अलोपः ।) मत्स्यविशेषः । गलाचिङ्गड़ी इति मोचाचिङ्गड़ी इति च भाषा ॥ तत्पर्य्यायः । महाशल्कः २ ।